कर्नाटकप्रशासनम्

# संस्कृतरश्मिः - २

## तृतीयभाषा - संस्कृतम

## सप्तमी कक्ष्या

(Revised)

## प्रथमः भागः

7

©KTBS
NOT TO BE REPUBLISHED

# SAMSKRITHA RASHMI-2

## SEVENTH STANDARD

## THIRD LANGUAGE - SANSKRIT

## PART-1

**KARNATAKA TEXTBOOK SOCIETY (R)**
**6th Cross, Malleshwaram, Bengaluru-560 003.**

# PREFACE

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi which in turn are designed on NCF- 2005 since June 2010. Textbooks are prepared in 12 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS, mathematics and 5th to 10th there are three core subjects namely mathematics, science and social science.

**NCF - 2005 has a number of special features and they are:**

- connecting knowledge to life activities
- learning to shift from rote methods
- enriching the curriculum beyond textbooks
- learning experiences for the construction of knowledge
- Making examinations flexible and integrating them with classroom experiences
- caring concerns within the democratic policy of the country
- making education relevant to the present and future needs.
- softening the subject boundaries - integrated knowledge and the joy of learning
- Making the child as the constructor of knowledge

The new books are produced based on three fundamental approaches namely, Constructive approach, Spiral Approach and Integrated approach.

@KTBS NOT TO BE REPUBLISHED

The learner is encouraged to think, engage in activities, master skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On other hand they help the learner in the all round development of his/ her personality, thus help him/ her become a healthy member of a healthy society and a productive citizen of this great country, India.

The most important objectives of teaching language are listening, speaking, reading, writing and reference work. These skills have been given a lot of importance in all the language textbooks. When learners master these competencies, they would stop studying textbooks for the sake of passing examinations. In order to help learners master these competencies, a number of paired and group activities, assignments nd project work have been included in the textbooks. it is expected that these activities would help learner master communicative skills. Ultimately, it is expected that students master the art of learning to learn and make use of these competencies in real life.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutiniser, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks. A few works of some writers and poets have been included in these textbooks. The textbook society is extremely grateful to them for giving their consent for the inclusion of these pieces in the textbooks.

©KTBS NOT TO BE REPUBLISHED

**Sri Nagendra Kumar**
Managing Director
Karnataka Textbook Society®
Bengaluru, Karnataka.

**Prof G. S. Mudambadithaya**
Co-ordinator
Curriculum Revision and Textbook Preparation
Karnataka Textbook Society®
Bengaluru, Karnataka.

# पठ्यपुस्तकरचनासमितिः

***अध्यक्षः -***

**डा।। वेङ्कटरामभट्टर्,** संस्कृताध्यापकः, न्याषल् प्रौढशाला बसवनगुडी, बेंङ्गलूरू.

***सदस्याः***

**विद्वान्।। परमेश्वर जि हेगडे,** संस्कृताध्यापकः, श्री शारदा प्रौढशाला, पाणेमङ्गलूरु, बण्ट्वाल (द.क.)

**विद्वान्।। गजानन मराठे,** संस्कृताध्यापकः, रोटरी प्रौढशाला, मूडबिर्दि (द.क.)

**श्री एन्.एस्. सुरेशः,** संयोजकः, भारतीयगधाम, उत्तनहळ्ळि, मैसूरु.

**विद्वान्।। प्रसाद,** संस्कृताध्यापकः, भारतमाताविदयामन्दिर-बालिका- प्रौढशाला हनुमन्तनगर, बेङ्गलूरु.

**विद्वान्।। महागणपतिः पि.एस.,** संस्कृताध्यापकः, श्रीधर्मस्थल मञ्जुनाथेश्वर आङ्गलमाध्यमशाला, उजिरे, द.क.

**विद्वान्।। दावल् साहेब्,** चित्रकलाशिक्षकः शङ्करेश्वर प्रौढशाला लग्गेरे बेङ्गलूरु.

**परिशीलकाः -**

**डा।। के.गणपति भट्टः,** निवृत्तशिक्षकः, रामदेव संस्कृत पाठशाला मालमड्डि धारवाड.

**प्रमुखसंयोजकाः**

**प्रो.जि.एस्.मुडम्बडित्तायः,** क.प.पु,सङ्घः, बेङ्गलूरु.

**प्रमुखमार्गदर्शकौ -**

**श्री नागेंद्र कुमार,** व्यवस्थापकनिर्देशकः, क.प.पु,सङ्घः, बेङ्गलूरु.

**श्रीमति सि. नागमणी,** उपनिर्देशका, क.प.पु,सङ्घः, बेङ्गलूरु.

**संयोजिका**

**श्रीमति एस्.एन्. लीलावती,** ज्येष्ठ सहायकनिर्देशिका, क.प.पु,सङ्घः, बेङ्गलूरु.

**सम्पादकौ**

**प्रो।। रामचन्द्र भट्टः कोटेमने,** उपकुलपतिवर्यः, योगविश्वविद्यानिलयः, जिगणि।

**डा।। श्रीनिवास वरखेडी,** प्राध्यापकः सङ्कायाध्याक्षः च, कर्णाटकसंस्कृतविश्वविद्यानिलयः, बेंङ्गलूरु.

NOT TO BE REPUBLISHED @KTBS

# प्राक् - कथनम्

विश्वस्मिन्नेव प्राचीनतमा भाषा संस्कृतम्। अस्यां भाषायां श्रेष्ठाः ग्रन्थाः उपलभ्यन्ते। सर्वाः भारतीय–भाषाः संस्कृतम् आश्रित्य प्रबुद्धाः सन्ति। राष्ट्रियभावैक्यं साधयितुं संस्कृतं महत्वपूर्णस्थानं भजते । "उ़दारचरितानान्तु वसुधैवकुटुम्बकम्" इति भावनां जनयति संस्कृतभाषा।

एतस्मिन् पुस्तके कर्णाटकप्रशासनस्य आदेशानुसारं संस्कृत – भाषाज्ञानार्थं च अवसरः कल्पितः अस्ति। २००५ तम – राष्ट्रिय – पाठ्यक्रमस्य (NCF) नियमानुसारं रचितमिदं पाठ्यपुस्तकम् अनधीतसंस्कृतानाम् अपि सहायकं भवेत् इति अस्माकम् आशयः।

पाठ्यपुस्तकनिर्माणे सहकृतवद्भ्यः सर्वेभ्यः सादरं कृतज्ञता समर्प्यते।

**- अध्यक्षः सदस्याश्च**

@KTBS
NOT TO BE REPUBLISHED

## About the Review of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the New Textbooks from standard one to ten, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the Textbook experts should follow: " The Textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment", he said.

Later, for the production of the Textbooks from class one to tenth, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the Textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and review if necessary. Afterwards, a new order was passed on 19-9-2015 which also give freedom even to re-write the Textbooks if necessary. In the same order, it was said that the completely reviewed Textbooks could be put to force from 2017-18 instead of 2016-17.

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had send them to the Education Minister and to the ' Textbook Society'. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education ' Teacher Associations'. Questionnaires were administered among teachers to pool up opinions. Separate meeting were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meeting were held for discussions. Women associations and science related organistation were also invited for discussions. Thus, on the basis of all inputs received from various sources, the textbooks have been reviewed where ever necessary.

© KTBS NOT TO BE REPUBLISHED

Another very important thing has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a critical study of the text of science, mathematics and social science subjects of central schools (N.C.E.R.T), along with state textbooks. Thus, the state text books have been enriched basing on the critical analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central school. Besides, these textbooks have been examined along side with the textbooks of Andhra, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only review, it is not the total preparation of the textbooks. Therefore, the structure of already prepared textbooks have in no way been affected or distorted. They have only been reviewed in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been effected into the textbooks.

© KTBS NOT TO BE REPUBLISHED

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the 'Textbook Society' who sincerely worked hard in forming the committees and managed to see the task reach it's logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also due to the subject experts and to the associations who gave valuable suggestions.

**Sri M. P. Madegowda**
Managing Director
Karnataka Textbook Society (R)
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
Textbook Revision Committees
Karnataka Textbook Society (R)
Bengaluru.

## परिष्करणा समिति

१. **प्रो. बरगूरु रामचन्द्रप्पः,** सर्वाध्यक्षः, राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेंगळूरु.

२. **श्री. के.एल्. ज्ञानप्रसाद् राव्,** अध्यक्षः, पठ्यपुस्तकपरिष्करणसमितिः, संस्कृत उपन्यासकः, विद्यावर्धक सङ्घ ज्यूनियर् कालेज्, राजाजिनगर, बेंगळूरु.

१. **श्री श्रीधरभट् ऐनकै,** निर्देशकः, वेदान्तभारति शिक्षण संस्था, के.आर्. नगर, मैसूरु जिल्ला.

२. **डा. संतोष् हानगल्,** संस्कृत प्राध्यापकः, संस्कृत विश्वविद्यालय (के.एस्.यु) बेंगळूरु.

३. **डा. एस्. प्रभुलिङ्ग देवरु,** प्रभारि प्राध्यापकः, सर्कारी श्री चामराजेन्द्र संस्कृत कालेज्, बेंगळूरु.

४. **श्रीमति सुमङ्गला हेगडे,** संस्कृत शिक्षकी, सर्कारि बलिका प.पू. कालेज्, १३ क्रास्, मल्लेश्वरं ,बेंगळूरु.

५. **श्री हजरत् अली. यु,** उपन्यासकः, ललित कला विभाग. तुमकूरु विश्व विद्यालय, तुमकूरु.

## परिष्करणोन्नतसमितिः

१. **डा.एच्.वि.वेणुगोपालः,** निवृत्तप्रांशुपालः, संस्कृतप्राध्यापकः, न्याषनल् कालेज् बसवनगुडि, बेंगलूरु।

२. **डा. जे.श्रीनिवासमूर्तिः,** निवृत्तप्रांशुपालः एम्.इ.एस्.कालेज्, मल्लेश्वरं, बेंगळूरु.

**प्रमुखमार्गदर्शकौ-**

**श्री एम्. पि. मादेगौड,** व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**श्रीमती एम्. डि. उषा,** उपनिर्देशिका, क.प.पु. सङ्घः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती सुमा बि.के,** ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

© KTBS NOT TO BE REPUBLISHED

# Foreword

In the pursuit of fostering a healthier and more balanced educational journey, we present this initiative aimed at reducing the weight of school bags. Education is the cornerstone of progress and it is our responsibility to ensure that the pursuit of knowledge is accompanied by the wellbeing of students.

As a first step, to reduce the burden of heavy bags, the School Education Department, Government of Karnataka has decided to print semester-wise textbooks in 2 parts i.e, Summative Assessment 1 and 2. This intervention will help significantly in reducing the weight of school bags.

This endeavour signifies a paradigm shift, acknowledging the strain posed by bulky bags on students.

©KTBS
NOT TO BE REPUBLISHED

Manjushree. N, IAS
Managing Director
Karnataka Textbook Society (R)

# पाठानुक्रमणिका


| | | पृष्ठाङ्कः |
|---|---|---|
| प्रथमः पाठः | प्रार्थना | १ |
| द्वितीयः पाठः | वर्णमाला | ५ |
| तृतीयः पाठः | वृक्षो रक्षति रक्षितः | ९ |
| चतुर्थः पाठः | सुबन्तप्रकरणम्–१ | १६ |
| पञ्चमः पाठः | शिशुगीतम् | २५ |
| षष्ठः पाठः | तिङन्तप्रकरणम्–१ | २७ |
| सप्तमः पाठः | संस्कृत वाङ्मयम् | ३० |
| अष्टमः पाठः | चतुरः वानरः | ३४ |
| नवमः पाठः | हनुमद्रामसङ्गमः | ३९ |
| परिशिष्टम् | १. अमरकोशसङ्ग्रहः | ४५ |
| | २. पाठयोजना | ४७ |
| | ३. प्रश्नपत्रिकायाः नीलनक्षा | ५१ |
| | ४. प्रश्नपत्रिका | ५२ |


NOT TO BE REPUBLISHED @KTBS

प्रथमः पाठः



# प्रार्थना

(कण्ठपाठः करणीयः)

विनायक गणाधीश
सर्वदेवनमस्कृत।
पार्वतीप्रिय विघ्नेश
मम विघ्नं निवारय ।।१।।





नमस्ते शारदे देवि
काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं
विद्यां बुद्धिं च देहि मे ।।२।।

अज्ञानतिमिरान्धस्य
ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन
तस्मै श्रीगुरवे नमः ।।३।।





नमस्तस्मै भगवते अर्हते
सम्यक् सम्बुद्धाय
बुद्धं शरणं गच्छामि
धर्मं शरणं गच्छामि
सङ्घं शरणं गच्छामि ।।४।।

@KTBS NOT TO BE REPUBLISHED

नम अर्हन्तानाम्
नमः सिद्धानाम् ।
नम आर्याणाम्
नम उपाध्यायानाम्
नमो लोके सर्वसाधूनाम् ।।५।।





विष्णुशक्तिसमुत्पन्ने
शङ्खवर्णे वसुन्धरे।
अनेकरत्नसम्पन्ने
भूमिदेवि नमोऽस्तुते ।।६।।

@KTBS NOT TO BE REPUBLISHED

**अन्वयः**

१. विनायक !
गणाधीश
सर्वदेवनमस्कृत !
पार्वतीप्रिय !
विघ्नेश !
} मम विघ्नं निवारय इति प्रार्थये

२. काश्मीरपुरवासिनि
देवि
शारदे
} ते नमः

अहं त्वां नित्यं प्रार्थये। मे विद्यां बुद्धिं च देहि।

३. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया येन चक्षुः उन्मीलितं श्रीगुरवे नमः।

४. भागवते
अर्हते } तस्मै नमः
सम्यक् सम्बुद्धाय

बुद्धं शरणं
धर्मं शरणं } गच्छामि
सङ्घं शरणं

५. अर्हन्तानाम्
सिद्धानाम्
आर्याणाम् } नमः
उपाध्यायानाम्
लोके सर्वसाधूनाम्

६. विष्णुशक्तिसमुत्पन्ने
शङ्खवर्णे } भूमिदेवि – ते नमः अस्तु।
वसुन्धरे
अनेकरत्नसम्पन्ने

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. मौखिकप्रश्नाः -

१. सर्वदेवनमस्कृतः कः ?

२. काश्मीरपुरवासिनी का ?

## २. एकवाक्येन उत्तरत -

१. पार्वतीप्रियः कः ?

२. विद्यादेवता का ?

३. कः चक्षुः उन्मीलयति ?

४. का अनेकरत्नसम्पन्ना ?

## ३. रिक्तस्थानं पूरयत-

१. मम __________ निवारय।

२. अनेकरत्नसम्पन्ने __________ नमोऽस्तुते।

## ४. पर्यायपदं लिखत -

१. विनायकः २. शारदा ३. गुरुः ४. तिमिरम्

## ५. विरुद्धार्थकपदं लिखत -

१. अज्ञानम् २. विघ्नम्

**रत्नाकराधौतपदां हिमालयकिरीटिनीम्।**

**ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम्॥**

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।**

**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥**

*.*.*.*.*

NOT TO BE REPUBLISHED @KTBS

# द्वितीयः पाठः

अक्षरज्ञानम्

## वर्णमाला

वर्णस्य "अक्षरम्" इति नामान्तरम् अस्ति। "अ" वर्णात् "ह्" इति वर्णपर्यन्तं विद्यमानं वर्णसमुदायं वर्णमाला इति कथयन्ति। ते च १.स्वराः २. अयोगवाहाः ३. व्यञ्जनानि इति। संस्कृतवर्णमालायां अष्टचत्वारिंशत् (४८) अक्षराणि सन्ति।




©KTBS NOT TO BE REPUBLISHED

### संयुक्ताक्षरम्

अनेकव्यञ्जनसंयोगात् संयुक्ताक्षरं भवति।

**उदाः**

१. मुकुन्दमाला = म्+उ+क्+उ+ न्+द्+अ +म्+आ+ल्+आ

न्द

२. रामभक्तः = र्+आ+म्+अ+भ्+अ+ क्+त्+अः

क्तः

३. समस्तम् = स्+अ+म्+अ+ स्+त्+अ +म्

स्त

## गुणिताक्षराणि

एकेन व्यञ्जनेन सह युक्तः स्वरः गुणिताक्षरं भवति।




@KTBS
NOT TO BE REPUBLISHED

## अभ्यासः

### १. मौखिकप्रश्नाः

१. वर्णो नाम कः?

२. वर्णस्य किमिति नामान्तरम् अस्ति?

३. वर्णमालायां कति विभागाः सन्ति?

४. वर्णमालायां कति अक्षराणि सन्ति?

### २. अधोलिखितानां वर्णानां पुरतः "स्वरः" अथवा "व्यञ्जनम्" इति लिखत।

१. ई ________

२. प् ________

३. र् ________

४. य् ________

५. आ ________

६. ए ________

७. च् ________

८. औ ________

९. ॠ ________

१०. ह् ________

@KTBS NOT TO BE REPUBLISHED

### ३. अधोलिखितेषु अक्षरेषु ह्रस्वस्वराणां तथा दीर्घस्वराणां चयनं (पृथक्) कृत्वा लिखत।

आ, अ औ, ओ, ई, ऋ, लृ, इ, उ, ऊ, ॠ, ए, ऐ

### ४. वियुज्य लिखत।

उदाहरणम् : रामः = र् + आ + म् + अः

१. सीता =

२. मारुतिः =

३. ईश्वरः =

४. शाला =

## ५. संयोज्य लिखत।

उदाहरणम् :- भ् + आ + र् + अ + त् + अ + म् = भारतम्

१. ल् + अ + त् + आ = ______

२. क् + औ + स् + अ + ल् + य् + आ = ______

३. क् + अ + न् + अ + क् + अः = ______




@KTBS NOT TO BE REPUBLISHED

# तृतीयः पाठः

**लट्लकारः आत्मनेपदी**

## वृक्षो रक्षति रक्षितः

**पीठिका -**

"भाषते इति भाषा" प्रतिदिनं नानास्थलेषु संभाषणस्य तथा शिष्टाचारस्य च ज्ञानम् अवश्यम्। अतः अत्र परिसरविषयकः- संभाषणपाठः प्रदत्तः।



१. प्राचीनकालादपि ऋषयः मुनयश्च परसिरं देवरूपेण समर्चयन्। अतः मानवानां सकलप्राणिनाञ्च जीवने परिसरस्य पात्रं विशिष्टं **वर्तते**। तेन मानवैः ज्ञातव्याः गुणाः अपि सन्ति। अतः यत्नतः संरक्षणीयं पर्यावरणम्। अत्र विशेषतः गो-वृक्ष-नदीनां महत्त्वम्, अद्य तेषां स्थितिः, अस्माभिः किं करणीयम् इत्यादिकं **निरूप्यते**।

| |
|---|
| **सूचना** - प्रणवः, भार्गवः, इस्मायिलश्च मित्राणि। विरामदिने एकत्र मिलित्वा नदीजले क्रीडन्तः सन्ति। |

**प्रणवः** - महान् प्रमोदः खलु जलक्रीडया।

**इस्मायिलः**- सत्यं भोः... प्रतिदिनं विरामः भवति चेत् प्रतिदिनं क्रीडनं साध्यं खलु।

**भार्गवः** – आम्...एवं प्रतिदिनं क्रीडामः चेत् गुरवः माम् अवश्यं दण्डयन्ति।

**प्रणवः** – रे... पश्य...! वार्तालापः **श्रूयते**........।तत्र के सन्ति? पश्यामः वा...

**भार्गवः** – आम् अहमपि शृणोमि तूष्णीं भवतु।
(गो नदि वृक्षाणां सम्भाषणं **श्रूयते**)

**नदी** – कष्टं भोः .... कष्टम्।

**वृक्षः** – हे तटिनि, किं भवत्याः कष्टम्?

**नदी** – सर्वत्र मां प्रदूषयन्ति। एते अज्ञाः जनाः यन्त्रागारेभ्यः मलिनजलं मम उदरे पूरयन्ति। तथा च मम जले स्नानं, वस्त्रप्रक्षालनादिकं कुर्वन्ति। अतः प्रतिदिनम् अहं मलिनतां प्राप्नोमि। मम परिशुद्धता नष्टा।

**धेनुः** – तरङ्गिणि, अहमपि भवत्सदृशी एव। पश्यतु मम क्षीरं जीविनाम् उत्तमः आहारः। गोमूत्र-गोमयादयः कृषिकार्ये, औषधक्षेत्रे च लोकेभ्यः उपयोगाय भवन्ति। तथापि जनाः मां हिंसयन्ति।

**वृक्षः** – भो मम स्थितिरपि तथैव। वायोः शुद्ध्यर्थं, मृदः संरक्षणार्थं मम योगदानं **वर्तते**। मानवानां अन्यजीविनां च जीवने मम उपयोगः



NOT TO BE REPUBLISHED © KTBS

अवश्यमेव भवति। तथापि मां पीडयन्ति, कर्तयन्ति च। तेन मम सङ्कुलमेव नाशयन्ति।

**धेनुः** – सत्यम्, अस्य परिणामः सर्वत्र **दृश्यते**। कुत्रापि शुद्धाहारः न **लभ्यते**।

**नदी** – यावत्पर्यन्तं जनाः अस्माकं संरक्षणं न कुर्वन्ति तावत्पर्यन्तं तेषां कष्टं वर्धत एव।

**वृक्षः** – आम्, अस्माकं योगदानं ते न स्मरन्ति इत्येव अस्माकं दुःखस्य कारणं खलु! भोः मानव! कदा भवतः जागृतिः?

(एतेषां वचनं श्रुत्वा बालाः परस्परं व्यवहरन्ति)

**प्रणवः** – हा.... कियत् दुःखिताः ते।

**इस्मायिलः**–मानवः तेषां कीदृशं कष्टं ददाति भोः।

**भार्गवः** – एवं न करणीयम्। तेषां संरक्षणं वयं मानवाः एव कुर्मः। मम गुरवः एकं श्लोकं अवदन् –

परोपकाराय फलन्ति वृक्षाः
  परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः
  परोपकारार्थमिदं शरीरम् ।।

एवं तेषां परोपकारगुणाः अनुसरणीयाः एव।

**इस्मायिलः**–प्रणव, गते विरामकाले अस्माकं शालातः प्रवासार्थं मैसूरुनगरं गतवन्तः।

**प्रणवः** – तत्र कः विशेषः?

**इस्मायिलः**–तत्र समीपे एव मलेमहदेश्वर इति पर्वतो वर्तते। तत्र वनस्पतीनां सस्योद्यानम् अस्ति। डा.ए.एन्.यल्लप्परेड्डी इति महोदयस्य मार्गदर्शनेन तत् निर्मितम्। बहुसुन्दरम् अस्ति भोः ....।

**भार्गवः** – रे.... तुमकूरुनगरसमीपे सिद्धरबेट्ट इति क्षेत्रेऽपि अन्यं सस्योद्यानम् अस्ति। अहं तत्र गतवान्।तत्रापि सस्यसङ्कुलानां संरक्षणं कुर्वन्ति।

© KTBS NOT TO BE REPUBLISHED



**प्रणवः** – ओ ... एवं वा? अस्माकं शालायामपि एतादृशानां क्षेत्राणां संदर्शनार्थं गच्छाम इति अध्यापकं प्रार्थयामि।

**भार्गवः** – परिसरस्य संरक्षणमहत्त्वबोधकानि विशिष्टकार्याणि अस्माकं शालायामपि कर्तुम् अहं ज्ञापयामि।

**इस्मायिलः**– सत्यम्, गो–वृक्ष–नदीनां संरक्षणविषये वयं विद्यार्थिनः अवश्यं प्रयत्नं कुर्मः।

**प्रणवः** – भोः ! आतपः अधिकः अभवत्। बुभुक्षा अपि **वर्धते**। गृहं गच्छामः।

**वागीशः** – अस्तु। शीघ्रं गच्छामः।

NOT TO BE REPUBLISHED @KTBS

## कठिनशब्दार्थः

प्रमोदः = सन्तोषः, आनन्दः, आमोदः, प्रदूषयन्ति=मलिनीकुर्वन्ति; सङ्कुलम् = समूहः; दुहन्ति = क्षीरं यच्छन्ति; बुभुक्षा = भोक्तुं इच्छा; योगदानम्= Contribution; वर्धते = अधिकं भवति; नदी - सरित्, शैवलिनी, धुनी, तटिनी, तरङ्गिणी; धेनुः = गौः, पयस्विनी; वृक्षः = तरुः, पादपः, महीरुहः, वनस्पतिः।

## अभ्यासः

### १. मौखिकप्रश्नाः -

१. प्रतिदिनं क्रीडामः चेत् किं भवति?

२. नदी प्रतिदिनं किं प्राप्नोति?

३. मृदः संरक्षणार्थं कस्य योगदानं वर्तते?

४. तुमकूरुनगरसमीपे किं क्षेत्रमस्ति?

### २. एकवाक्येन उत्तरं लिखत -

१. प्रतिदिनं विरामः भवति चेत् किं साध्यम्?

२. यन्त्रागारेभ्यः मलिनजलं कस्य उदरे पूरयन्ति?

३. केषां जीवने वृक्षस्य उपयोगः अवश्यं भवति?

४. वनस्पतीनां सस्योद्यानं कुत्र अस्ति?

५. नद्यः किमर्थं वहन्ति?

६. विद्यार्थिनः कस्मिन् विषये प्रयत्नं कुर्युः?

© KTBS NOT TO BE REPUBLISHED

## ३. रिक्तस्थानं पूरयत-

१. नदीजले ______ ______ च कुर्वन्ति।

२. तथापि ________ धेनुं हिंसयन्ति।

३. वायोः शुद्ध्यर्थं वृक्षस्य _________ वर्तते।

४. भो! मानव, कदा भवतः ______ ।

## ४. पर्यायपदं लिखत -

१. नदी    २. वृक्षः    ३. धेनुः    ४. प्रमोदः

## ५. कोष्टकात् उपयुक्तं शब्दं चित्वा रिक्तस्थानानि पूरयत।

१. बालकानां वार्तालापः __________ । (श्रूयन्ते, श्रूयते)

२. मानवाः नदीजलं __________ । (प्रदूषयन्ति, प्रदूषयति)

३. वयं देवालयं __________ । (गच्छामि, गच्छामः)

४. तत्र हिमालयपर्वतः__________ । (वर्तते, वर्तन्ते)

५. गुरवः अवश्यं __________ ।(दण्डयन्ति, दण्डयति)

## ६. लकार - पुरुष - वचनानि लिखत-

१. प्राप्नोमि    २. अभवत्    ३. ददाति    ४. स्मरन्ति

NOT TO BE REPUBLISHED @KTBS

**७. इतरवचनरूपाणि लिखत -**

१. ____________ भवतः ____________ ।

२. अपठम् ____________ ____________ ।

३. ____________ ____________ अवर्तन्त ।

४. वर्तते ____________ ____________ ।

५. ____________ पठावः ____________ ।

**८. मातृभाषया उत्तरं लिखत।**

१. परोपकारस्य महत्त्वं लिखत।

२. जलप्रदूषणं कथं भवति ?

*.*.*.*

©KTBS
NOT TO BE REPUBLISHED

# चतुर्थः पाठः

## सुबन्तप्रकरणम्–1

१. संस्कृतभाषायां शब्दौ द्विविधौ। तौ नामपदम् क्रियापदं च। नामपदस्य "सुबन्तम्" इति अपरं नामधेयं वर्तते। "सुप्" प्रत्यायान्तं "सुबन्तम्"। सुबन्तस्य मूलरूपं "प्रातिपदिकम्"।

प्रातिपदिकम् + सुप् प्रत्ययः = सुबन्तम्

राम + सु = रामः

२. पूर्वतनकक्ष्यायां केचन सुबन्ताः ज्ञाताः। अत्रापि पुनः तेषां स्मारणार्थं केचन सुबन्ताः दीयन्ते। एतेषां कण्ठपाठः करणीयः।

३. सुबन्तम् त्रिषुलिङ्गेषु, त्रिषु वचनेषु तथा सप्तविभक्तिषु व्यवह्रियते। यः वर्णः यस्य शब्दस्य अन्ते श्रूयते सः तत्–वर्णान्तः भवति।

©KTBS NOT TO BE REPUBLISHED



## १. अकारन्तः पुंलिङ्गः "राम" शब्दः - ರಾಮನು

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | | |
|---|---|---|---|---|---|
| प्रथमा विभक्तिः | रामः | रामौ | रामाः | ರಾಮನು | ಉ |
| सं.प्र विभक्तिः | हे राम | हे रामौ | हे रामाः | ಎಲೈ ರಾಮನೇ | ಎಲೈ |
| द्वितीया विभक्तिः | रामम् | रामौ | रामान् | ರಾಮನನ್ನು | ಅನ್ನು |
| तृतीया विभक्तिः | रामेण | रामाभ्याम् | रामैः | ರಾಮನಿಂದ | ಇಂದ |
| चतुर्थी विभक्तिः | रामाय | रामाभ्याम् | रामेभ्यः | ರಾಮನಿಗೆ | ಗೆ |
| पञ्चमी विभक्तिः | रामात् | रामाभ्याम् | रामेभ्यः | ರಾಮನ ದೆಸೆಯಿಂದ | ದೆಸೆಯಿಂದ |
| षष्ठी विभक्तिः | रामस्य | रामयोः | रामाणाम् | ರಾಮನ | ಅ |
| सप्तमी विभक्तिः | रामे | रामयोः | रामेषु | ರಾಮನಲ್ಲಿ | ಅಲ್ಲಿ |

एवं – देव, छात्र, जन, गज, देश, अश्व इत्यादयः ।

@KTBS NOT TO BE REPUBLISHED

## २. आकारान्तः स्त्रीलिङ्गः "सीता" शब्दः - ಸೀತೆಯು

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सीता | सीते | सीताः |
| हे सीते | हे सीते | हे सीताः |
| सीताम् | सीते | सीताः |
| सीतया | सीताभ्याम् | सीताभिः |
| सीतायै | सीताभ्याम् | सीताभ्यः |
| सीतायाः | सीताभ्याम् | सीताभ्यः |
| सीतायाः | सीतयोः | सीतानाम् |
| सीतायाम् | सीतयोः | सीतासु |

©KTBS NOT TO BE REPUBLISHED

एवं शाला, माला लता, गीता इत्यादयः।

## ३. अकारान्तः नपुंसकलिङ्गः "वन" शब्दः - ಕಾಡು

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| वनम् | वने | वनानि |
| हे वन | हे वने | हे वनानि |
| वनम् | वने | वनानि |
| वनेन | वनाभ्यां | वनैः |
| वनाय | वनाभ्यां | वनेभ्यः |
| वनात् | वनाभ्यां | वनेभ्यः |
| वनस्य | वनयोः | वनानाम् |
| वने | वनयोः | वनेषु |

एवं – जल, ज्ञान, फल, धन इत्यादयः।

©KTBS NOT TO BE REPUBLISHED

## ४. इकारान्तः पुंलिङ्गः "कवि" शब्दः - ಕವಿಯು

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| कविः | कवी | कवयः |
| हे कवे | हे कवी | हे कवयः |
| कविम् | कवी | कवीन् |
| कविना | कविभ्यां | कविभिः |
| कवये | कविभ्यां | कविभ्यः |
| कवेः | कविभ्यां | कविभ्यः |
| कवेः | कव्योः | कवीनाम् |
| कवौ | कव्योः | कविषु |

एवं – हरि, गिरि, रवि, कपि इत्यादयः।

©KTBS NOT TO BE REPUBLISHED

## ५. ईकारान्तः स्त्रीलिङ्गः “नदी” शब्दः - ನದಿಯು

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नदी | नद्यौ | नद्यः |
| हे नदि | है नद्यौ | हे नद्यः |
| नदीम् | नद्यौ | नदीः |
| नद्या | नदीभ्याम् | नदीभिः |
| नद्यै | नदीभ्याम् | नदीभ्यः |
| नद्याः | नदीभ्यां | नदीभ्यः |
| नद्याः | नद्योः | नदीनाम् |
| नद्याम् | नद्योः | नदीषु |

एवं – जननी, भगिनी, नारी, पुत्री इत्यादयः।

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

**१. निम्नलिखितानां सर्वासु विभक्तिषु सर्वेषु वचनेषु रूपाणि लिखत।**

१. राम    २. वन

**२. निम्नलिखितानां लिङ्गवचनविभक्तीः लिखत।**

१. रामेषु    २. सीताभ्यः    ३. नदीभिः    ४. कविषु

**३. कोष्टकात् उचितं शद्बम् अवचित्य रिक्तस्थानं पूरयत।**

१. अयोध्यायां ________ नाम राजा आसीत् (श्रीरामम्, श्रीरामः)

२. ________ त्रयः भ्रातरश्च आसन् (तेषाम्, तस्य)

३. तेषु________श्रीरामं छायेव अनुसरति स्म। (लक्ष्मणेन, लक्ष्मणः)

४. सीता________ भार्या आसीत् । (श्रीरामस्य, श्रीरामेण)

**४. इतरवचनरूपाणि लिखत।**

१. ________ नद्यौ________ ।    ३. ________ ________ रामाः।

२. सीता________ ________ ।    ४. ________ वने________।

**५. रिक्तस्थानं पूरयत।**

१. रामः → रामस्य : सः → [          ]

२. वनम् → वने : एषा → [          ]

©KTBS NOT TO BE REPUBLISHED

३. सीता → सीताः : सा →

४. कविना → कवेः : मया →

## ६. पट्टिकां दृष्ट्वा षष्ठीविभक्तौ रूपाणि लिखत।

उदाः – रामः दशरथस्य पुत्रः ।

**रामः**

- (दशरथ) पुत्रः।
- (लक्ष्मण) अग्रजः।
- (सीता) पतिः।
- (विश्वामित्र) शिष्यः।
- (आञ्जनेय) स्वामी।

@KTBS
NOT TO BE REPUBLISHED

*.*.*.*



@KTBS
NOT TO BE REPUBLISHED

# पञ्चमः पाठः

लट् लकारः

## शिशुगीतम्

(कण्ठपाठः करणीयः)

१. गानम् सर्वेषां मुदं जनयति। संस्कृतभाषायामपि कवयः एतादृशानि गानगुणविशिष्टानि पद्यानि रचितवन्तः। आधुनिकसंस्कृतकविषु अन्यतमः डा।। एच्.आर्. विश्वासः। तस्य गीतसङ्कलनात् इंद गीतमुद्धृतम्।

चटक, चटक, रे चटक!
चिवँ् चिवँ् **कूजसि** त्वं विहग!

नीडे **निवससि** सुखेन **डयसे**
**खादसि** फलानि मधुराणि।
**विहरसि** विमले विपुले गगने
**नास्ति** जनः खलु वारयिता ।।१।।

मातापितराविह मम न **स्तः**
एकाकी खलु खिन्नोऽहम्।
एहि समीपं चिवँ् चिवँ् मित्र
**ददामि** तुभ्यं बहु धान्यम् ।।२।।

चणकं स्वीकुरु **पिब** रे नीरं
त्वं पुनरपि रट चिवँ् चिवँ् चिवँ्।
तोषय मां कुरु मधुरालापं
पाठय मामपि तव भाषाम् ।।३।।

**डा. एच्.आर्.विश्वासः**

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. मौखिकप्रश्नाः -

१. चटकः कुत्र निवसति?
२. कीदृशे गगने चटकः विहरति?
३. शिशुगीतम् पद्यस्य रचयिता कः?

### २. एकवाक्येन उत्तरं लिखत-

१. कः सुखेन डयते?
२. इह कौ न स्तः?
३. चटकः किं स्वीकरोति?
४. चटकः केन तोषयति?

### ३. रिक्तस्थानं पूरयत-

१. तुभ्यं ____________ ददामि।
२. ____________ मामपि पाठय।
३. चणकं स्वीकुरु पिब रे ____________ ।

### ४. संयोज्य लिखत -

| | |
|---|---|
| १. निवससि | चणकम् |
| २. विहरसि | फलानि |
| ३. स्वीकुरु | गगने |
| ४. खादसि | मधुरालापेन |
| ५. तोषय | नीडे |

@KTBS NOT TO BE REPUBLISHED

## षष्ठः पाठः

**क्रियापदज्ञानम्**

# तिङन्तप्रकरणम्

क्रियापदस्य मूलरूपं धातुः इति कथ्यते । संस्कृतभाषायां प्रायः २००० धातवः सन्ति । एते धातवः दशसु गणेषु विभक्ताः । क्रियापदस्य तिङन्तम् इति अन्यत् नाम । तिङन्तस्य वर्तमानकालस्य रूपाणि अत्र दत्तानि।

**पठ् धातुः, परस्मै पदम्, वर्तमानकालः, लट् लकारः।**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रामः, लता, सः, सा — पठति | रामौ, लते, तौ, ते — पठतः | रामाः, लताः, ते, ताः — पठन्ति |
| मध्यमपुरुषः | त्वम् — पठसि | युवाम् — पठथः | यूयम् — पठथ |
| उत्तमपुरुषः | अहम् — पठामि | आवाम् — पठावः | वयम् — पठामः |

एवं – लिखति, गच्छति, भवति, नमति, यच्छति, क्रीडति, हसति, नृत्यति, खादति, पिबति, चोरयति, ताडयति इत्यादयः।

©KTBS NOT TO BE REPUBLISHED

## शोभ्धातुः - आत्मनेपदम् - लट् लकारः - वर्तमानकालः

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | रामः, लता, सः, सा — शोभते | रामौ, लते, तौ, ते — शोभेते | रामाः, लताः, ते, ताः — शोभन्ते |
| मध्यमपुरुषः | त्वम् — शोभसे | युवाम् — शोभेथे | यूयम् — शोभध्वे |
| उत्तमपुरुषः | अहम् — शोभे | आवाम् — शोभावहे | वयम् — शोभामहे |

एवम् – एधते, वन्दते, सेवते, मोदते, याचते, वर्धते, वर्तते, लभते, सहते, जायते, प्रार्थयते, क्रियते इत्यादयः।

© KTBS NOT TO BE REPUBLISHED

### अभ्यासः

**१. कोष्टकात् उपयुक्तं शब्दम् अवचित्य रिक्तस्थानानि पूरयत।**

१. बालः विद्यालयं ______________ । (गच्छामि / गच्छति)

२. कौसल्या पाठं ______________ । (स्मरति / स्मरसि)

३. बालाः एकं सर्पं ______________। (पशयति / पश्यन्ति)

४. भिक्षुकः अन्नं ______________। (याचन्ते / याचते)

५. परिश्रमी विद्यां ______________। (लभे / लभते)

**२. लकार - पुरुष - वचनानि लिखत।**

१. पठसि  २. वर्तेते

**३. इतरवचन रूपाणि लिखत।**

१. ______________ भवतः ______________ ।

२. पठसि ______________ ______________ ।

३. ______________ ______________ पठामः।

४. ______________ ______________ शोभन्ते।

५. वर्तते ______________ ______________ ।

**४. क्रियापदं सर्वेषु पुरुषवचनेषु लिखत।**

१. पठति २. वर्तते

**५. वाक्यं पठित्वा क्रियापदस्य लकारं सूचयत।**

१. पुत्रः नगरं गच्छति।

२. कृष्णः धनं यच्छति।

३. तत्र जनाः वर्तन्ते।

४. देवः भक्तान् पालयति।

@KTBS NOT TO BE REPUBLISHED

*.*.*.*

**गावो मे पुरतः सन्तु गावो मे सन्तु पृष्टतः।**
**गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम्।।**
**नमः सूर्याय चन्द्राय मङ्गलाय बुधाय च।**
**गुरुशुक्रशनिभ्यश्च राहवे केतवे नमः।।**

लट्-परस्मै पदम्

# सप्तमः पाठः

## संस्कृतवाङ्मयम्

**पीठिका** – जगति अनेकाः भाषाः सन्ति। तासु संस्कृतभाषा अपि अन्यतमा। अस्याः देवभाषा, गीर्वाणवाणी, सुरभारती इति नामान्तराणि सन्ति। प्राचीनकालादारभ्य वेदसाहित्य–तत्त्वज्ञान–विज्ञानादि विषयाः संस्कृते निहिताः सन्ति। संस्कृते देवपूजायाः मन्त्राः एव न। एषा भाषा तत्वज्ञानं धर्मसाहित्य विज्ञानादि विषयाणां सङ्गमभूमिः। अतः संस्कृतभाषायां किं किम् अस्ति इति जिज्ञासूनां अवबोधः भवति चेत् तस्याः भाषायाः महत्त्वं ज्ञातं भवति। अयं विषयः अस्मिन् पाठे निरूपितः अस्ति।

© KTBS Not to be republished



वैदिकसाहित्यम् – वेदः विश्वस्य प्रथमः साहित्यप्रकारः। स च ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च इति चतुर्धा विभक्तः। वेदस्य अन्तिमः भागः उपनिषद् इयं वेदान्तः इत्यपि प्रसिद्धा अस्ति। अत्र विविधदेवताविषयकानि सूक्तानि आयुर्वेदादि सर्वविधविज्ञानविषयाः निरूपिताः।

वैद्यशास्त्रम्– चरकसुश्रुतवाग्भटादयः वैद्यकीयक्षेत्रे ग्रन्थान् विलिख्य

महत्त्वम् योगदानं दत्तवन्तः। एतेषु योगनिदानं, कायचिकित्सा, शल्यक्रिया इत्यादयः अंशाः सुस्पष्टम् वर्णिताः सन्ति।

ऐतिहासिककाव्ये – महर्षिवाल्मीकिना विरचितं रामायणं आदिकाव्यमिति प्रसिद्धं । वेदव्यासमुनिना लिखितं महाभारतम् इति अपरम् ऐतिहसिककाव्यमिति प्रसिद्धम्। तस्मिन् काव्ये भगवद्गीता अपि अन्तर्भवति। अष्टादश पुराणानि अपि वेदव्यासमुनिना प्रणीतानि।

नीतिशास्त्रम् – चाणक्यप्रणीते अर्थशास्त्रे राजनीतिः, अर्थनीतिश्च निरूपितः। विष्णुशर्मणा प्रणीतं पञ्चतंत्रम् इति नीतिकथासंग्रहः अनेकासु भाषासु अनूदितः शोभते। सोमदेवस्य कथासरित्सागरः, भर्तृहरेः नीतिशतकं, काशीनाथशर्मा इत्यादीनां सुभाषितसंग्रहाः ग्रन्थाः अस्यां भाषायां सन्ति।

खगोलशास्त्रम् – आर्यभट, वराहमिहिर, भस्कराचार्य, ब्रह्मगुप्तादीनां ग्रन्थेषु खगोलविज्ञानस्य विषयाः निरूपिताः सन्ति। ग्रहनक्षत्रादीनां चलनं, सूर्यचन्द्रयोः ग्रहणं इत्यादयः अनेके विषयाः अत्र निरूपिताः। न केवलं एतावदेव परन्तु शङ्कराचार्य, मध्वाचार्यादीनां वेदान्तिनां वेदान्तग्रन्थाः, पणिनिमहर्षेः अष्टाध्यायी, नागार्जुनस्य रसायनशास्त्रम्, कणादमहर्षेः परमाणु विषयमधिकृत्य ग्रथितानि वैशेषिक सूत्राणि, पराशर महर्षेः कृषिशास्त्रम् इत्यहो संस्कृतभाषा वैभवं वक्तुं न वयं पारयामः। एवं संस्कृतवाङ्मयम् मानवस्य न केवलं भौतिकोत्कर्षम् अधिकृत्य विचारान् प्रस्तौति, अपि तु पारलौकिकान् विचारान् अपि प्रतिपादयति। एवं संस्कृतवाङ्मयं इहपरकल्याणसाधिका विराजते।

© KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. संस्कृतभाषायाः नामान्तरं किम्?

२. चतुर्वेदाः के?

३. रामायणस्य रचयिता कः?

४. भगवद्गीता कस्मिन् ग्रन्थे अन्तर्भवति?

५. विष्णुशर्मणा रचितं नीतिशास्त्रप्रतिपादकं पुस्तकं किम्?

६. अष्टाध्यायी इति व्याकरणग्रन्थस्य कर्ता कः?

### २. रिक्तस्थानं पूरयत।

१. ______________ ग्रन्थः अनेकासु भाषासु अनुदितः अस्ति।

२. नीतिशतकस्य कर्ता ______________ ।

३. कौटिल्यस्य कृतिः ______________।

### ३. संयोज्य लिखत।

| | |
|---|---|
| १. सुभाषितानि | कृषिशास्त्रम् |
| २. पराशरः | महाभारतम् |
| ३. गीर्वाणवाणी | खगोलविज्ञानी |
| ४. आर्यभटः | भर्तृहरिः |
| ५. वेदव्यासः | संस्कृतभाषा |

### ४. लिङ्ग-विभक्ति-वचनानि लिखत।

१. मुनिना २. भाषा ३. तस्मिन् ४. एषा

@KTBS NOT TO BE REPUBLISHED

**५. लकार-पुरुष-वचनानि-लिखत।**

१. सन्ति    २. अभवत्    ३. आसन्    ४. भवति

**६. वाक्ये योजयत।**

१. अन्यतमा    २. योगदानम्    ३. करोति    ४. विलिख्य

**७. विरुद्धार्थकपदं लिखत।**

१. अन्तः    २. अस्ति

**८. संन्धिं विभज्य नाम लिखत।**

१. इत्यादि    २. अनूदितास्ति

**९. संस्कृतभाषायाः महत्त्वं मातृभाषया वर्णयत।**

@KTBS
NOT TO BE REPUBLISHED

# अष्टमः पाठः

सर्वनाम

## चतुरः वानरः

**पीठिका** – बालकाः सहजतया कथाप्रियाः भवन्ति। नीतिकथाः नीतिबोधने परिणामकारिकाः भवन्ति। विष्णुशर्मा नाम पण्डितः पञ्चतन्त्रं रचितवान्। अत्र मित्रलाभः, मित्रभेदः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकं चेति पञ्चतन्त्राणि सन्ति। अत्र कविः, पशु-पक्षि-पर्वत-वनस्पतीनां द्वारा मनुष्य-स्वभावं वर्णयति, नीतिं च बोधयति।



NOT TO BE REPUBLISHED

अत्र मित्रभेदात् स्वीकृता एका कथा दत्ता अस्ति। अत्र चातुर्यम्, दुर्जन सज्जनानां स्वभावादयः – गुणदोषाः वर्णिताः सन्ति।

१. गङ्गानदीतटे एकः जम्बूवृक्षः असीत्। **तस्मिन्** वृक्षे एकः वानरः अवसत्। **सः** सदा पक्वानि जम्बूफलानि भक्षयति स्म। **तस्यां** नद्याम् एकः मकरोऽपि वसति स्म। एकदा वानरः **तस्मै** मकराय जम्बूफलानि अयच्छत्। एवं **तयोः** मध्ये मैत्री अभवत्।

२. एकदा मकरः पत्न्यै अपि प्रदातुं नदीमध्ये स्थितं स्वगृहं प्रति जम्बूफलानि अनयत्। स्वादूनि फलानि स्वपत्न्यै अयच्छत्। **सा** तानि अभक्षयत्, अचिन्तयत् च – **यः** प्रतिदिनं ईदृशानि स्वादूनि फलानि खादति नूनं **तस्य** हृदयम् अपि अतिस्वादु भवति। वानरस्य हृदयम् **अहम्** अवश्यं भक्षयामि इति। **सा** स्वस्याः इच्छां मकरं प्रति अवदत्। **तं** वानरं केनापि प्रकारेण स्वगृहं प्रति आनेतुं निर्बन्धम् अकरोत्।

३. मकरः नदीतटम् आगच्छत्। वानरं प्रति अवदत् – मित्र! **तव** भ्रातृजाया **तव** दर्शनाय उत्सुका अस्ति। कृपया **मम** गृहम् आगच्छ इति। सरलस्वभावः वानरः मकरस्य पृष्ठम् आरोहत्, प्रस्थानं च अकरोत् मकरः नदीमध्ये वानरं प्रति – मित्र, **मम** पत्नी **तव** हृदयाय स्पृहयति। अत एव **त्वां** गृहं नयामि इति अवदत्।



@KTBS NOT TO BE REPUBLISHED

४. मकरस्य अभिप्रायं वानरः ज्ञातवान्। सपदि **सः** चतुरः वानरः मकरं प्रति – मित्र, किमर्थं **त्वं** प्रथममेव **एतत्** न अवदः? चिन्ता मास्तु। **मम** हृदयं तु वृक्षे एव अस्ति। **मां** वृक्षं प्रति नय इति अवदत् । मूर्खः मकरः वानरं नदीतटम् आनयत्। वानरः वृक्षम् आरोहत्, अवदत् च – मूर्ख! किं हृदयं शरीरात् पृथक् भवति? धिक् **त्वाम्**। **त्वं** कृतघ्नः। गच्छ, **आवयोः** मैत्री समाप्ता इति।

## अभ्यासः

### १. एकवाक्येन उत्तरत-

१. जम्बूवृक्षः कुत्र आसीत्?
२. वृक्षे कः अवसत्?
३. वानरः कीदृशानि फलानि अभक्षयत्?
४. कयोः मध्ये मैत्री अभवत्?
५. मकरः फलानि कस्यै दातुम् अनयत्?

### २. एतेषां पदानां समानार्थकपदं पाठात् चित्वा लिखत-

१. तरुः ______________ २. कपिः ______________
३. भार्या ______________ ४. शीघ्रम् ______________
५. चतुरः ______________

### ३. एतेषां पदानां विरुद्धार्थकपदं पाठात् चित्वा लिखत-

१. अपक्वानि ______________ २. वैरम् ______________
३. कटु ______________ ४.शत्रुः ______________

### ४. सन्धिपदं विभज्य सन्धिनाम लिखत-

१. मकरोऽपि = ______________ + ______________
२. अपि + अतिस्वादु = ______________
३. केनापि = ______________ + ______________
४. दर्शनाय + उत्सुका = ______________
५. मास्तु = ______________+ ______________

@KTBS NOT TO BE REPUBLISHED

## अवधेयांशाः

### अ. उदाहरणानुसारं विशेषणं विशेष्यं च चित्वा लिखत।

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| उदा – सुन्दरः बालकः | सुन्दरः | बालकः |
| १. पक्वानि जम्बूफलानि | | |
| २. तस्यां नद्याम् | | |
| ३. स्वादूनि फलानि | | |
| ४. सरलस्वभावः वानरः | | |
| ५. मूर्खः मकरः | | |
| ६. तस्मै मकराय | | |

### रेखाङ्कितपदानि आदृत्य प्रश्ननिर्माणं कुरुत।

| | |
|---|---|
| उदा – रामः **दशरथस्य** पुत्रः। | रामः कस्य पुत्र? |
| १. वानरः **मकराय** फलानि अयच्छत्। | १. ________________? |
| २. ________________ | २. मकरः **नदीतटम्** अगच्छत्। |
| ३. **भ्रातृजाया** तव दर्शनाय उत्सुका अस्ति। | ३. ________________ |
| ४. ________________ | ४. वानरः **मकरस्य** पृष्ठम् आरोहत्। |

### पाठस्य आधारेण वाक्यमिदं कः / कां प्रति वदति इति लिखत।

| वाक्यानि | कः/का वदति? | कं प्रति वदति? |
|---|---|---|
| १. वानरस्य हृदयम् अहम् अवश्यं भक्षयामि। | ________ | ________ |
| २. मम पत्नी तव हृदयाय स्पृहयति। | ________ | ________ |
| ३. गच्छ, आवयोः मैत्री समाप्ता । | ________ | ________ |

@KTBS NOT TO BE REPUBLISHED

४. अत एव त्वां गृहं नयामि। __________ __________

५. अतः मां वृक्षं प्रति नय। __________ __________

६. मम हृदयं तु वृक्षे एव अस्ति। __________ __________

**मातृभाषया उत्तरं लिखत।**

१. वानरस्य चातुर्यं विशदयत।

२. मकरस्य धूर्तबुद्धिं वर्णयत।

**आ) व्याकरणविशेषः - हृदयाय स्पृहयति - स्पृह् इति धातोः योगे चतुर्थीविभक्तिः भवति। उदाहरणम् अनुसृत्य, उचितविभक्तिरूपेण रिक्तस्थानं पूरयत)**

उदा – वानरः आम्रफलाय स्पृहयति। (आम्रफलम्)

१. गोविन्दः ____________________ स्पृहयति। (मोदकम्)

२. पुत्रः ____________________ स्पृहयति। (चाकलेहः)

३. जननी ____________________ स्पृहयति। (शाटिका)

४. बालकः ____________________ स्पृहयति। (क्रीडनकम्)

**व्याकरणविशेषः - धिक् त्वाम् - धिक् इति अव्ययस्य योगे द्वितीयाविभक्तिः भवति।**

उदा – दुर्जनं धिक् । (दुर्जनः)

१. ______________________________ धिक्। (कौरवः)

२. ______________________________ धिक्। (पुरुषाधमः)

३. ______________________________ धिक्। (वञ्चकः)

४. ______________________________ धिक्। (राक्षसः)

@KTBS NOT TO BE REPUBLISHED

# नवमः पाठः

लङ्लकारः

## हनुमद्रामसङ्गमः



NOT TO BE REPUBLISHED

**पीठिका** – आदिकाव्यस्य रामायणस्य कर्ता वाल्मीकिः । किष्किन्धाकाण्डस्य तृतीयसर्गात् अयं पाठः सङ्गृहीतः । ऋष्यमूकपर्वतं प्रति रामलक्ष्मणौ आगतवन्तौ इति वार्तां श्रुत्वा वानराधिपः सुग्रीवः स्वमन्त्रिणं मारुतिं तत्र प्रेषयति । ततः आञ्जनेयः रामलक्ष्मणसमीपम् आगत्य तौ विधिवत् सम्पूज्य सुग्रीवस्य वृत्तान्तं निवेद्य प्रार्थयत। तदा रामः मारुतेः व्यवहारचातुर्यम् अवलोक्य लक्ष्मणं प्रति कथयति। वार्ताहरः कीदृशो भवेत् इति अनेन ज्ञायते ।

वचो विज्ञाय हनुमान् सुग्रीवस्य महात्मनः ।
पर्वतादृश्यमूकात्तु पुप्लुवे यत्र राघवौ ।।१।।

कपिरूपं परित्यज्य हनूमान् मारुतात्मजः ।

भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः ।।२।।

सम्पूज्य विधिवद्वीरो हनूमान् मारुतात्मजः ।
उवाच कामतो वाक्यं मृदु सत्यपराक्रमौ ।।३।।

राजार्षिदेवप्रतिमौ तापसौ संशितव्रतौ ।
देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ ।।४।।

सर्वभूषणभूषार्हौ किमर्थं न विभूषितौ ।
उभौ योग्यावहौ मन्ये रक्षितुं पृथिवीमिमाम् ।।५।।

सुग्रीवो नाम धर्मात्मा कश्चिद्वानरयूथपः ।
वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ।।६।।
प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ।
राज्ञा वानरमुख्यानां हनूमान् नाम वानरः ।।७।।

युवाभ्यां सहधर्मात्मा सुग्रीवः सख्यमिच्छति ।
एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् ।।८।।

नूनं व्याकरणं कृत्समनेन बहुधा श्रुतम् ।
उच्चारयति कल्याणीं वाचं हृदयहारिणीं ।।९।।

एवं गुणगणैर्युक्ता यस्य स्युः कार्यसाधकाः ।।
तस्य सिध्यन्ति सर्वार्था दूतवाक्यप्रचोदिताः ।।१०।।

यथा ब्रवीषि हनुमन् ! सुग्रीववचनादिह ।
तत्तथा हि करिष्यामो वचनात्तव सत्तम ।।११।।

NOT TO BE REPUBLISHED @KTBS

## अन्वयार्थः -

१. हनूमान् = मारुतिः, महात्मनः= महाभागस्य, सुग्रीवस्य = वानराधिपतेः, वचः=वचनम्, विज्ञाय = ज्ञात्वा, ऋष्यमूकपर्वतात् = ऋष्यमूकाख्यशैलात्, यत्र = यस्मिन् प्रदेशे, राघवौ = रामलक्ष्मणौ, स्तः = उषितवन्तौ, (वासं कृतवन्तौ), तत्प्रदेशं प्रति, पुप्लुवे = उड्डयनं कृतवान्।

२. मारुतात्मजः = वायुपुत्रः, कपिः = मर्कटः, हनुमान् – आञ्जनेयः, कपिरूपम् = वानररूपम् परित्यज्य = त्यकत्वा, ततः = अनन्तरम्, शठबुद्धितया = वञ्चकबुद्धितया, भिक्षुरूपम् = ब्रह्मचारिवेषं भेजे = धृतवान् ।

३. वीरः = धीमान्, मारुतात्मजः हनूमान् = वायुपुत्रो अञ्जनासुतः, सत्यपराक्रमौ = सत्यसन्धौ पराक्रमशालिनौ (रामलक्ष्मणौ), विधिवत् = यथा शास्त्रम्, सम्पूज्य = अभिवन्द्य, (अभ्यर्चनं कृत्वा),कामतः = भक्त्या, (सुग्रीवस्य उपदेशं यथावत् मनसि स्वीकृत्य स्वेच्छया), मृदु = मनोहराक्षरैः, वाक्यम् = वचनम्, उवाच = उक्तवान् ।

४. राजर्षि–देवप्रतिमौ = चक्रवर्ति – मुनिदेवसमानौ, तापसौ = तपोबलयुक्तौ, संशितव्रतौ = कठोरव्रतधारिणौ, वरवर्णिनौ = अमितरूपवन्तौ, भवन्तौ = रामलक्ष्मणौ, इमं देशम् = एतद् अरण्यप्रदेशं प्रति, कथं प्राप्तौ = किमर्थम् आगतवन्तौ ।

५.सर्वभूषणभूषार्हौ = समस्ताभरणालङ्कारयोग्यौ, किमर्थम् = केन प्रकारेण, न विभूषितौ = अलङ्कारानर्हौ जातौ, अहं = मारुतिः, मन्ये = जाने, उभौ = भवन्तौ, इमाम्= एताम्, पृथिवीम् = भूमण्डलम्, रक्षितुम् = परिपालयितुम्, योग्यौ = कुशलिनौ इति ।

६. धर्मात्मा = धार्मिकः, सुग्रीवो नाम = सुग्रीवो नामक कपिवीरः, कश्चित् = एकः शाखामृगः, वानरयूथपः = प्लवङ्गराजः (कपिकुलराजः), वीरः = शूरः,

@KTBS NOT TO BE REPUBLISHED

भ्रात्रा = अग्रजेन वालिना, विनिकृतः= वञ्चितः, दुःखितः = शोकयुक्तः सन्, जगत् = लोके, भ्रमति = परिभ्रमति ।

७.अहम् = कश्चित् शाखामृगः, हनूमान् नाम = हनूमान् इति नाम्ना प्रसिद्धः, वानरः = कपिः, महात्मना = अमितपराक्रमशालिना, वानरमुख्यानाम् = कीशवंशप्रमुखानाम्, राज्ञा = अधिपतिना, तेन सुग्रीवेण - येन सुग्रीवेण, प्रेषितः = संप्रेषितः, प्राप्तः = अत्र आगतः(अस्मि)।

८. धर्मात्मा = धर्मिष्ठः, सुग्रीवः = सुग्रीवाख्यो राजा, युवाभ्यां सह = भवद्भ्यां साकम्, सख्यम् = मित्रताम् (मैत्रीम्) इच्छति = कामयते (वाञ्छति), माम् = मारुतिम्, तस्य = सुग्रीवस्य, सचिवम् = अमात्यम्, पवनात्मजम् = वायुपुत्रम्, वानरम् = प्लवगम् (इति) विद्धि = विजानीहि (मन्यताम्)।

९. अनेन = मारुतिना, कृत्स्नम् = समग्रम्, व्याकरणम् = वेदमुखस्वरूपं व्याकरणशास्त्रम्, बहुधा = बहुप्रकारेण, श्रुतम् = अधीतम्, कल्याणीम् = शुभलक्षणाढ्याम्, हृदयहारिणीम् = मनोह्लादकरीम्, वाचम् = वचनम्, उच्चरयति = सम्भाषयति ।

१०. एवम् = अनया रीत्या, गुणगणैः = सौशील्यादि गुणसमूहैः, युक्ताः = संयुक्ताः, यस्य = राज्ञः, कार्यसाधकाः = कार्यनिर्वाहकाः, स्युः = भवन्ति । तस्य = राज्ञः, दूतवाक्यप्रचोदिताः = सेवकवचनबलात्, सर्वार्थाः = सर्वाणि कार्याणि, सिध्यन्ति = सफलतां यान्ति ।

११.हे हनुमन्= हे वायुपुत्र ! हे सत्तम = हे सत्पुरुष ! सुग्रीववचनात् = सुग्रीवस्य उपदेशानुसारम्, त्वम् = भवान्, यथा = येन प्रकारेण, ब्रवीषि = कथयसि. तव = भवतः वचनात् = वाक्यबलात्, इह = अस्मिन् अवसरे, तत्=इदम्, तथा करिष्यामः = कर्तुं प्रभवामः ।

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. मौखिकप्रश्नाः

१. वाल्मीकिः किं काव्यं रचितवान् ?

२. वानराणां राजा कः ?

३. रामलक्ष्मणौ कुत्र आगतवन्तौ ?

४. हनुमतः पितरौ कौ ?

### २. रिक्तस्थानानि समूहतः चित्वा पूरयत ।

१. पर्वतात् ____________ पुप्लुवे ।

२. कपिरूपं परित्यज्य ____________ ततो भेजे ।

३. उच्चारयति ____________ हृदयहारिणीम् ।

४. नूनं ____________ कृत्स्नम् अनेन ____________ श्रुतम् ।

(व्याकरणम्, बहुधा, कल्याणीं वाचम्, भिक्षुरूपम्, ऋष्यमूकात्)

©KTBS NOT TO BE REPUBLISHED

### ३. उदाहरणानुसारं विभक्तिरूपं लिखत ।

**उदा - रामः-रामस्य**

सुग्रीवः ____________

वानरः ____________

यः ____________

कल्याणी ____________

**उदा-वनम्-वने**

रामायणम् ____________

देशः ____________

पर्वतः ____________________

व्याकरणम् ____________________

**४. पर्यायपदानि समूहतः चिनुत ।**

१.सचिवः ____________________

२.समूहनायकः ____________________

३.कीशः ____________________

४. कुटिलमतिः ____________________

( प्लवगः, शठबुद्धिः, यूथपः, अमात्य : )

**५.विरुद्धार्थकपदं लिखत ।**

१.मृदु २. दुःखम् ३. प्राप्तः ४. धर्मात्मा

**६. पञ्चषैः वाक्यैः मातृभाषया उत्तरं लिखत ।**

१. सुग्रीवः रामलक्ष्मणयोः साहाय्यं किमर्थं वाञ्छति ?

२. कार्यसाधकस्य गुणाः के के इति लिखत।

@KTBS NOT TO BE REPUBLISHED

*.*.*.*

**यावदस्ति त्रयी लोके**

**चतुर्मुखमुखोद्भवा।**

**यावद्वा रामचरितं**

**वाल्मीकिमुनिचित्रितम्।।**

# 1. अमरकोशसङ्ग्रहः

## (केवलं कण्ठपाठार्थम्)

| | |
|---|---|
| उपेन्द्र इन्द्रावरजः चक्रपाणिश्चतुर्भुजः। | ವಿಷ್ಣು |
| पद्मनाभो मधुरिपुः वासुदेवः त्रिविक्रमः।। | Lord Vishnu |
| गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसीवृषध्वजः। | ಶಿವ |
| व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः।। | Lord Shiva |
| श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः। | ಗಾಳಿ |
| पृषदश्वो गन्धवहो गन्धवाहोऽनिलाशुगाः।। | Air |
| हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः। | ಬ್ರಹ್ಮ |
| स्त्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड्विधिः।। | Brahma |
| मदनोमन्मथो मारः प्रद्युम्नो मीनकेतनः। | ಮನ್ಮಥ |
| कन्दर्पो दर्पकोऽनङ्गःकामः पञ्चशरः स्मरः।। | Cupid |
| गृहं गेहोदवसिते वेश्म सद्म निकेतनम्। | ಮನೆ |
| निशान्त वस्त्यसदनं भवनागारमन्दिरम्।। | House |
| नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्मखम्। | ಆಕಾಶ - Sky |
| अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः। | ಅಗ್ನಿ - Agni |
| शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः। | ಹಕ್ಕಿ - Bird |
| गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा। | ಗಂಗೆ |
| भागीरथी त्रिपथगा त्रिस्त्रोता भीष्मसूरपी।। | Ganges |
| निषादर्षभगान्धारः षड्ज मध्यम धैवताः। | ಸಪ್ತ ಸ್ವರಗಳು |

NOT TO BE REPUBLISHED © KTBS

| | |
|---|---|
| पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः।। | Seven musical notes |
| ब्राह्मीमाहेश्वरी चैव कौमारी वैष्णवी तथा। | ಸಪ್ತ ಮಾತೃಕೆಯರು |
| वाराही चैव चेन्द्राणी चामुण्डासप्तमातरः।। | Seven Matrikas |
| अणिमा महिमा चैव गरिमा लघिमा तथा। | ಅಷ್ಟಸಿದ್ಧಿಗಳು |
| प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टभूतयः।। | Eight Siddhis |
| महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ। | ನವನಿಧಿಗಳು |
| मुकुन्द-कुन्द-नीलाश्च खर्वश्च निधयो नव।। | Nine Treasures |
| अयनं वर्त्म मार्गाध्व पन्थानः पदवी सृतिः। | ರಸ್ತೆ |
| सरणिः पद्धतिः पद्या वर्तन्येकपदीति च।। | Road |
| रिपौ वैरि सपत्नारी द्विषद्वेषण दुर्हृदः। | ಶತ್ರು -Enemy |
| अद्रिर्गोत्र गिरिग्रावाचल शैल शिलोच्चयाः। | ಬೆಟ್ಟ-Mountain |
| सुन्दरं रुचिरं चारु मनोज्ञं मञ्जुमञ्जलम्।। | ಸುಂದರ-Beautiful |

*·*·*·*

**क्षरन्त्यमृतधारा वा**
**यावद्व्यासस्य सूक्तयः।**
**वाग्देव्या वरपुत्रस्य**
**कालिदासस्य वा गिरः।।**

@KTBS NOT TO BE REPUBLISHED

# पाठयोजना

| मासाः | पाठाः | अवधयः |
|---|---|---|
| जून् | प्रार्थना - वर्णमाला | १६ |
| जुलै | वृक्षो रक्षति रक्षितः, सुबन्त प्रकरणम्-१, शिशुगीतम् | १६ |
| आगस्ट् | तिङन्त प्रकरणम्-१, संस्कृतवाङ्मयम्, चतुरः वानरः, | १६ |
| सेप्टेम्बर | हनुमद्रामसङ्गमः | १६ |
| अक्टोबर | पुनरावर्तनम् प्रथमषाण्मासिकपरीक्षा | १६ |
| | | ८० |

## प्रश्नपत्रिकायाः रचनास्वरूपम्

प्रश्नाः मौल्यमापनस्य प्रमुखसाधनानि भवन्ति। प्रश्नाः सामर्थ्याधारिताः अधिगतांशाधारिताः च भवेयुः। मासिकपरीक्षायाः षाण्मासिकपरीक्षायाः वा, प्रश्नपत्रिका शालास्तरे शिक्षकेण सज्जीकरणीया। षाण्मासिक परीक्षायाः प्रश्नपत्रिका नीलनक्षाद्वारा एव निर्मातव्या। प्रश्नपत्रिकायाः रचनावसरे अनुसर्तव्याः अंशाः।

❊ उद्दिष्टानाम् आधारेण प्रतिशताङ्कानां वितरणम्।

| उद्दिष्टाः | ज्ञानम् | ग्रहणम् | अभिव्यक्तिः | प्रशंसा |
|---|---|---|---|---|
| प्रतिशत अङ्काः | २५% | ४०% | ३०% | ५% |

@KTBS NOT TO BE REPUBLISHED

* विषयानुगुणम् अङ्कवितरणम्

| गद्यम् | पद्यम् | व्याकरणम् |
| --- | --- | --- |
| ४०% | २५% | ३५% |

* पठ्यांशानां प्रतिशताङ्कानां वितरणम्

| क्रमसंख्या | पाठः/घटकाः | प्रश्नानां संख्या | अङ्काः | प्रतिशतम् |
| --- | --- | --- | --- | --- |
| १ | | | | |
| २ | | | | |
| ३ | | | | |

@KTBS NOT TO BE REPUBLISHED

* प्रश्नानां स्वरूपमाधारीकृत्य प्रतिशताङ्कानां वितरणम्।

अत्र प्रश्नद्वारा उद्दिष्टानां तथा पाठ्यांशानां परीक्षा भवति। अस्मिन् भागे वस्तुनिष्ठ-लघु-विवरणात्मकोत्तराणां भवन्ति। अत्र अङ्कानां वितरणम् एवम् अस्ति

| क्रमसंख्या | प्रतिशत अङ्काः | प्रश्नानां सङ्ख्या | निर्दिष्टाङ्काः |
|---|---|---|---|
| वस्तुनिष्ठः | ३०% | | |
| लघूत्तराणि | ५०% | | |
| विवरणात्मकोत्तराणि | २०% | | |
| आहत्य | १००% | | |

* अङ्कानां वितरणम् प्रश्नानां निर्माणं च सुलभात् कठिनं भवेत्।

| स्तरः | प्रतिशताङ्काः | प्रश्नानां सङ्ख्या | अङ्काः |
|---|---|---|---|
| सुलभः | ३०% | | |
| सामान्यः | ५०% | | |
| कठिनः | २०% | | |
| आहत्य | १००% | | |

@KTBS
NOT TO BE REPUBLISHED

✲ नीलनक्षायाः रचना

| क्रम संख्या | पाठाः/ अध्यायः | ज्ञानम् | | | ग्रहणम् | | | अभिव्यक्तिः | | | प्रशंसा | | | आहत्य | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | प उ | ल उ | वि उ | प उ | ल उ | वि उ | प उ | ल उ | वि उ | प उ | ल उ | वि उ | प्रश्नाः | अङ्क |
| | | | | | | | | | | | | | | | |
| | आहत्य प्रश्नाः | | | | | | | | | | | | | | |
| | आहत्याङ्काः | | | | | | | | | | | | | | |

@KTBS
NOT TO BE REPUBLISHED

## ३. प्रश्नपत्रिकायाः नीलनक्षा
## संस्कृतम् - तृतीयभाषा

कक्ष्या –VII | अङ्काः–४०

| क्र संख्या | पाठाः | ज्ञानात्मकः | | | ग्रहणात्मकः | | | अभिव्यक्त्यात्मकः | | | प्रशंसात्मकः | | | आहत्य | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | प.उ | ल.उ | वि.उ | प.उ | ल.उ | वि.उ | प.उ | ल.उ | वि.उ | प.उ | ल.उ | वि.उ | प्रश्नाः | अङ्काः |
| 1. | प्रार्थना | 1(1) | - | - | - | - | - | 1(1) | - | - | - | - | - | 2 | 2 |
| 2. | वर्णमाला | 1(1) | - | 1(4)* | - | 1(1) | - | - | - | - | - | - | - | 2/3 | 2/6 |
| 3. | वृक्षोरक्षति रक्षितः | 1(1) | - | | - | - | - | - | 1(4) | - | - | - | - | 2 | 5 |
| 4. | सुबन्तप्रकरणम् | | 1(1) | - | - | 1(1) | 1(2) | - | - | - | - | - | - | 3 | 4 |
| 5. | शिशुगीतम् | 1(1) | - | - | - | 1(1) | - | 1(1) | - | - | - | - | - | 3 | 3 |
| 6. | तिङन्तप्रकरणम् | 1(1) | - | - | 1(1) | - | - | 1(1) | - | - | - | - | - | 3 | 3 |
| 7. | संस्कृत वाङ्मयम् | 1(1) | - | - | | 1(1) | 2(2) | - | - | - | - | - | - | 4 | 6 |
| 8. | चतुरः वानरः | 1(1) | - | - | 1(1) | - | - | - | - | - | - | - | 1(4) | 3 | 6 |
| 9. | हनुमद्रामसङ्गमः | - | 1(1) | - | 1(1) | 1(1) | 1(3) | 3(3) | - | - | - | - | - | 7 | 9 |
| | आहत्य प्रश्नाः | 07 | 02 | 1* | 4 | 5 | 03 | 07 | 01 | - | - | - | 01 | 30 | - |
| | आहत्य अङ्काः | 07 | 02 | | 4 | 5 | 07 | 07 | 04 | - | - | - | 04 | - | 40 |
| | उद्धिष्ट अङ्काः | | 09 | | | 16 | | 11 | | | | | 04 | | 40 |

आवरणात् बहिः प्रश्न सङ्ख्या, आवरणे अङ्काः उक्ताः। प.उ = परिचयात्मकम् उत्तरम्, वि.उ = विवरणात्मकम्, ल.उ= लघु उत्तरम्

*अथवा

@KTBS NOT TO BE REPUBLISHED

# प्रश्नपत्रिका

**कक्ष्या - VII** **संस्कृतम् - तृतीयभाषा** **समयः - ९० निमेषः**

**अङ्काः - ४०**

## १. एकावाक्येन उत्तरं लिखत । $5 \times 1 = 5$

१. विद्यादेवता का?

२. विद्यार्थिनः कास्मिन् विषये प्रयत्नं कुर्युः।

३. चटकः किं स्वीकरोति?

४. नद्यः किमर्थं वहन्ति?

५. मकरस्य गृहं कुत्र आसीत्?

## २. रिक्तस्थानं पूरयत। $4 \times 1 = 4$

१. कौटिल्यस्य कृतिः ________________ ।

२. पर्वतात् ________________पुप्लुवे।

३. मम________________निवारय।

४. तुभ्यं ________________ ददामि।

## ३. एकं पद्यं पूर्णं कुरुत। $1 \times 4 = 4$

१. जपाकुसुम ________________________।

________________________दिवाकरम् ।।

२. चणकं स्वीकुरु ______________________।

________________________ तव भाषाम्।।

@KTBS NOT TO BE REPUBLISHED

**४. समानार्थकपदं लिखत।** 3 × 1 = 3

१. नदी २. धेनुः ३. तरुः

**५. विरुद्धार्थकपदं लिखत।** 3 × 1 = 3

१. चतुरः २. अस्ति ३. सुरः

**६. सन्धिं विभज्य नाम लिखत।** 3 × 1 = 3

१. चिन्ताक्रान्ता २. मकरोऽपि ३. इत्यादि

**७. लिङ्ग - विभक्ति - वचनानि लिखत।** 3 × 1 = 3

१. मुनिना २. नदी ३. युष्मत्

**८. सर्वविभक्तिवचनेषु शब्दमेकं लिखत।** 1 × 4 = 4

१. तद्(पुलिङ्गः) अथवा २. नदी

**९. पदं विभज्य लिखत। (वर्णविन्यासं कुरुत)** 2 × 1 = 2

१. तत्रैव २. स्वायम्भुवमनुः

**१०. क्रियापदम् एकं लिखत।** 1 × 3 = 3

१. लिखति अथवा २. अवदत्

©KTBS NOT TO BE REPUBLISHED

**११. आङ्ग्ल/कन्नड/संस्कृत - भाषया वा पञ्चषैः वाक्यैः उत्तरं लिखत।** $2 \times 2 = 4$

१. सुग्रीवः रामलक्ष्मणयोः साहाय्ये किमर्थं वाञ्छति?

२. संस्कृतवाङ्मयस्य महत्त्वं वर्णयत?

**१२. मातृभाषया अनुवादं कुरुत।** $2 \times 1 = 2$

१. भानुवासरे शालायाः विरामः भवति।

२. अहं शालां गच्छामि।

**मौखिकप्रश्नाः**

१. काश्मीरपुरवासिनी का?

२. अनेकरत्नसम्पन्ना का?

३. चटकः कुत्र निवसति?

४. व्यञ्जनाक्षराणि कानि?

५. राम अथवा वन शब्दं सर्वविभक्तिषु वदत ।

६. रामस्य सहोदराः के?

७. नदी प्रतिदिनं किं प्राप्नोति?

८. जन्बूवृक्षः कुत्र आसीत्?

९. लिखति क्रियापदस्य सर्वपुरूषरुपाणि वदत।

१०. वर्णो नाम कः?

@KTBS
NOT TO BE REPUBLISHED